International Journal of Multidisciplinary Horizon

ISSN: **3049-2017**
IJMH 2026; 3(4): 01-03
© 2026 IJMH
www.themultijournal.com
Received: 15-06-2026
Accepted: 01-07-2026
Publish : 02-07-2026

**Dr. Nigamananda Panigrahi**
Classical Sanskrit Teacher,
Govt. High School, Ukkamba,.

**Correspondence:**
**Dr. Nigamananda Panigrahi**
Classical Sanskrit Teacher,
Govt. High School, Ukkamba,.

# अविद्यास्वरूपविमर्शः

**Dr. Nigamananda Panigrahi**

**प्रस्तावना -**

भारतीयदर्शनपरम्परायां वेदान्तदर्शनं परमप्रधानं दार्शनिकदर्शनम् इति सर्वैरपि स्वीकृतम्। वेदान्तस्य प्रमुखप्रयोजनं ब्रह्मस्वरूपस्य प्रतिपादनं, जीवब्रह्मणोरैक्यस्य प्रकाशनं, संसारबन्धस्य कारणनिरूपणं, मोक्षस्य साधनस्वरूपप्रतिपादनं चेति। एतेषां सर्वेषां विषयाणां सम्यगवगमः अविद्यातत्त्वस्य विवेचनं विना न सम्भवति। अत एव अद्वैतवेदान्ते अविद्या केवलं गौणो विषयः न, अपितु सम्पूर्णसिद्धान्तस्य केन्द्रबिन्दुरूपेण परिगण्यते।

आदि शङ्कराचार्य प्रतिपादयति यत् परमार्थतः ब्रह्मैव सत्यम्, जगन्मिथ्या, जीवो ब्रह्मैव नापरः। किन्तु प्रत्यक्षे सर्वे जनाः स्वात्मानं देहादिभिः सहाभिन्नं मन्यन्ते, कर्तृत्वभोक्तृत्वादिधर्मान् स्वात्मनि कल्पयन्ति, सुखदुःखाद्यनुभवान् स्वाभाविकानिव गृह्णन्ति। एष एव विरोधः अद्वैतवेदान्ते “अध्यासः” इति प्रसिद्धः। तस्य मूलकारणं अविद्या इति शाङ्करवेदान्तस्य निश्चयः। तदेव ब्रह्मसूत्रभाष्यम्-अध्यासभाष्ये प्रसिद्धया उक्त्या प्रतिपादितम्—

**“स्मृतिरूपः परत्र पूर्वदृष्टावभासोऽध्यासः।”**

अर्थात् यत्र यद् वस्तु नास्ति, तत्र तस्यैव आरोपः अध्यासः इति कथ्यते। देहे आत्मबुद्धिः, आत्मनि देहधर्मकल्पना, नित्ये ब्रह्मणि जगद्भेदप्रतीतिः—एते सर्वेऽपि अविद्याजन्याध्यासस्यैव परिणामाः। अविद्यायाः स्वरूपविषये, तस्याः कार्ये, निवृत्तौ, विषये, आश्रये च अद्वैताचार्याणां मध्ये बहवः सूक्ष्मविचाराः दृश्यन्ते। विशेषतः “अविद्यायाः आश्रयः कः?” इति प्रश्नः अद्वैतवेदान्ते महत्त्वपूर्णतमः दार्शनिकविवादः जातः। यदि ब्रह्म सर्वथा शुद्धं निर्विकारं चास्ति, तर्हि अविद्या तस्मिन्नाश्रयमापद्येत कथम्? यदि जीव एव आश्रयः, तर्हि जीवः स्वयं अविद्याकल्पितः सन् कथमविद्याया आश्रयो भवेत्? एष एव “आश्रयानुपपत्तिः” इति प्रसिद्धः दार्शनिकविवादः।

एतदेव कारणं यत् अद्वैतसम्प्रदाये द्वौ प्रमुखौ प्रवाहौ विकसितौ—

- **भामती-प्रस्थानम्, यत्र जीवाश्रयवादः प्रमुखतया प्रतिपाद्यते।**
- **पञ्चपादिकाविवरण-प्रस्थानम्, यत्र ब्रह्माश्रयवादः समर्थ्यते।**

अनयोः पक्षयोः समर्थनार्थं बहवः ग्रन्थाः विरचिताः। वेदान्तसार, वेदान्तपरिभाषा, सिद्धान्तबिन्दु, अद्वैतसिद्धि, नैष्कर्म्यसिद्धि, पञ्चदशी इत्यादिषु अविद्याविषयः बहुधा निरूपितः।

**अविद्यायाः स्वरूपम् -**

अद्वैतवेदान्तस्य समग्रदर्शनस्य मूलाधारः अविद्या इति तत्त्वम्। यद्यपि श्रुतिषु "अविद्या", "अज्ञानम्", "माया", "तमः", "अव्यक्तम्" इत्यादयः शब्दाः विभिन्नप्रसङ्गेषु प्रयुक्ताः दृश्यन्ते, तथापि अद्वैताचार्यैः एतेषां तात्त्विकसमन्वयः कृतः। अविद्यैव संसारस्य मूलकारणम्, अध्यासस्य बीजम्, जीवस्य बन्धहेतुः, ब्रह्मस्वरूपावगमस्य च प्रमुखप्रतिबन्धिका इति अद्वैतसिद्धान्तः। उपनिषदः प्रतिपादयन्ति यत् जीवस्य संसारपरिभ्रमणस्य कारणं बाह्यवस्तूनि न, अपितु आत्मस्वरूपस्य अज्ञानमेव। कठोपनिषद् अविद्यायां वर्तमानानां जनानां स्वात्मविस्मृतिं वर्णयति। भगवद्गीतायां "अज्ञानेनावृतं ज्ञानम्" इति वचनद्वारा अज्ञानस्य आवरणशक्तिः प्रतिपादिता। शङ्कराचार्यः अस्य भाष्ये स्पष्टयति यत् आत्मा स्वभावतः नित्यप्रकाशस्वरूपः; अज्ञानं तस्य प्रकाशस्य विरोधी न, किन्तु तद्विषयकसम्यग्बोधस्य प्रतिबन्धकम्।

अतः अविद्याया स्वरूपं केवलो ज्ञानाभावः न, किन्तु अनुभव-सिद्धोऽध्यासहेतुरिति।

अध्यासभाष्ये शङ्कराचार्येण प्रतिपादितः अध्यासः अविद्यायाः कार्यरूपेण विविच्यते। देहधर्माणामात्मनि, आत्मधर्माणां देहे आरोपः—एष एव संसारव्यवहारस्य मूलम्। भाष्यकारः "अध्यासः" इति शब्दं प्रयुञ्जानः अविद्यां प्रत्यक्षतया परिभाषितुं न प्रवर्तते, किन्तु तस्याः कार्यदर्शनद्वारा स्वरूपं बोधयति। अनेन ज्ञायते यत् अविद्या अनादिः, अनुभवसिद्धा, ज्ञाननिवर्त्या च।

वेदान्तसारकारः सदानन्दयोगीन्द्रः अविद्यायाः प्रसिद्धं लक्षणं निर्दिशति—सा सदसद्भ्यामनिर्वचनीया, त्रिगुणात्मिका, ज्ञानविरोधिनी, भावरूपा इति। अस्य लक्षणस्य प्रत्येकं पदं दार्शनिकदृष्ट्या महत्त्वपूर्णम्। "सदसद्भ्यामनिर्वचनीया" इति पदेन अविद्या न परमार्थसत्ता, न च सर्वथा असत्ता इति प्रतिपाद्यते। यदि सा परमार्थसत्ता स्यात् तर्हि ज्ञानेन न निवर्तेत; यदि सर्वथाऽसत्ता स्यात् तर्हि जगत्प्रपञ्चस्य कारणं न स्यात्। अतः तस्याः अनिर्वचनीयत्वमेव अद्वैतस्य वैशिष्ट्यम्।

"भावरूपा" इति विशेषणमपि महत्त्वपूर्णम्। न्यायदर्शने अज्ञानं केवलाभावरूपं मन्यते, किन्तु अद्वैतवेदान्ते जगत्प्रपञ्चस्य अनुभव-रूपकारणत्वात् अविद्या भावरूपा स्वीकृता। रज्जुसर्पभ्रमवत् अविद्यायाः विक्षेपशक्त्या भ्रान्तिज्ञानं जायते।

वेदान्तपरिभाषायां धर्मराजाध्वरीन्द्रः अविद्यां प्रमाणमीमांसायाः परिप्रेक्ष्ये विविच्य दर्शयति यत् आत्मज्ञानमेव अविद्यानिवर्तकम्। तत्र अविद्या अनादिरूपा, आवरण-विक्षेपशक्तिसमन्विता, अध्यासस्य कारणभूता च। वेदान्तपरिभाषायाः टीकाकाराः प्रतिपादयन्ति यत् यदि अविद्या केवलोऽभावः स्यात्, तर्हि भ्रान्तेः, स्मृतेः, जगदनुभवस्य च युक्त्या निरूपणं न सिध्येत्। अतः तस्या भावरूपस्वीकारः अनिवार्यः।

भामती-प्रस्थाने भामती-कारः अविद्यां जीवाश्रितां मन्यते। वाचस्पतिमिश्रस्य मतानुसारं संसारस्य अनुभवः जीवेनैव क्रियते, आत्मज्ञानमपि जीवस्यैव भवति, अतः अविद्याया आश्रयोऽपि जीव एव युक्तः। यद्यपि अयं विषयः मुख्यतया आश्रयविचारे विस्तरेण भविष्यति, तथापि स्वरूपदृष्ट्या भामतीकारः अविद्यां जीवोपाधिसम्बद्धाम् अनादिभावरूपां च स्वीकरोति।

विवरण-प्रस्थाने पञ्चपादिकाविवरण-कारः प्रकाशात्मयतिः अविद्यां ब्रह्माश्रितां प्रतिपादयति। तस्याभिप्रायः—यतः ब्रह्मैव सर्वाधिष्ठानम्, तस्मात् अविद्यायाः परमाश्रयोऽपि ब्रह्मैव। तथापि अविद्या ब्रह्मणः स्वरूपधर्मो न, किन्तु अनिर्वचनीयशक्तिरूपेण कल्प्यते। अयं मतभेदः अद्वैतपरम्परायां अत्यन्तगम्भीरदार्शनिक-विमर्शस्य कारणम्।

विद्यारण्यस्वामिनः पञ्चदशी-ग्रन्थे अविद्या तथा माया इत्येतयोः समष्टि-व्यष्टि-दृष्ट्या विवेचनं दृश्यते। समष्टिदृष्ट्या माया, व्यष्टि-दृष्ट्या अविद्या इति व्यवहारभेदः स्वीकृतः। आवरणशक्त्या ब्रह्मस्वरूपस्य अप्रकाशः, विक्षेपशक्त्या जगदाभासः—इत्ययं विवेचनक्रमः पञ्चदश्यां स्पष्टतया निरूपितः।

मधुसूदनसरस्वती अद्वैतसिद्धि-ग्रन्थे नव्यनैयायिकानां बहून् आक्षेपान् निराकुर्वन् अविद्यायाः अनिर्वचनीयत्वं, भावरूपत्वं, ज्ञान-निवर्त्यत्वं च युक्तिभिः समर्थयति। तेन दर्शितं यत् अविद्याया स्वरूपं न केवलं श्रुतिसिद्धम्, अपि तु युक्तिसिद्धमपि। ज्ञानोत्पत्तौ अविद्यानाशः कथमिति विषयः तेन सूक्ष्मतया विवेचितः।

समस्ताचार्यमतानां समन्वयेन एतदेव निष्पद्यते यत् अविद्या - अनादिः, अनिर्वचनीया, भावरूपा, ज्ञाननिवर्त्या, संसारस्य उपादा-नकारणरूपा, अध्यासस्य मूलकारणम्, आवरण-विक्षेपशक्तिसम-न्विता च।

यद्यपि भामती-विवरणयोः आश्रयविषये मतभेदः दृश्यते, तथापि अविद्याया मूलस्वरूपे उभयोरपि पर्याप्तः साम्यभावः विद्यते। एतदेव साम्यं परवर्ती "आश्रयत्वविचारे" निर्णायकं भविष्यति।

**अविद्यायाः लक्षणम् -**

वेदान्तसार-कारः अविद्यायाः लक्षणं बहुसूक्ष्मतया निरूपयति। तस्य तात्पर्यम् एतत् यत् अविद्या सदसद्भ्यामनिर्वचनीया, त्रिगुणा-त्मिका, ज्ञानविरोधिनी, भावरूपा, अनादिरूपा, ज्ञाननिवर्त्या च अस्ति। एतानि विशेषणानि केवलं वर्णनार्थानि न, अपि तु अद्वैत-वेदान्तस्य तात्त्विकाधाररूपाणि सन्ति।

**(१) सदसद्भ्यामनिर्वचनीयत्वम्**

अद्वैतदर्शने "सत्" इति त्रिकालाबाधितं ब्रह्म उच्यते, "असत्" इति सर्वथा तुच्छं यथा शशशृङ्गम्। अविद्या तु न ब्रह्मवत् नित्यसत्ता, न च शशशृङ्गवत् सर्वथाऽसत्ता। सा अनुभवगोचरा अस्ति, किन्तु ब्रह्मज्ञानसमये बाध्यते। अतः सा अनिर्वचनीया इति कथ्यते।

शाङ्करपरम्परायां रज्जुसर्पदृष्टान्तः अस्य विषयस्य प्रमुखदृष्टान्तः। भ्रान्तिसर्पः व्यवहारे भयहेतुः भवति, किन्तु यथार्थज्ञानोदयेन नश्यति। तथैव अविद्या व्यवहारे संसारकारणम्, परमार्थतः तु ज्ञानेन निवर्तते। भामती तथा पञ्चपादिकाविवरण उभयत्रापि अनिर्वचनीयत्वं स्वीकृतम्, यद्यपि आश्रयविषये मतभेदः दृश्यते।

**(२) त्रिगुणात्मकत्वम्**

अविद्या सत्त्व-रजस्-तमोगुणात्मिका इति अद्वैताचार्याणां सिद्धान्तः। एते गुणाः जगत्प्रपञ्चस्य विविधतां व्याख्यापयन्ति। सत्त्वम् – प्रकाशः, प्रसादः, ज्ञानोपयोगि, रजः – प्रवृत्तिमत्, स्पन्दनम्, कर्मप्रवणतामत्, तमः – आवरणम्, मोहः, अज्ञानम्।

पञ्चदशी-ग्रन्थे समष्टिदृष्ट्या मायायाः, व्यष्टिदृष्ट्या अविद्यायाः गुणत्रयात्मकत्वं निरूपितम्। जगतः वैचित्र्यं गुणत्रयस्यैव परिणाम-रूपेण व्याख्यायते।

**(३) ज्ञानविरोधित्वम् -**

अविद्याया मुख्यधर्मः ज्ञानविरोधित्वम्। अयं विरोधः प्रकाश-अन्धकारयोः विरोधवत् न, किन्तु आत्मतत्त्वस्य यथार्थबोधस्य प्रतिबन्धरूपः।

भगवद्गीता (५.१५) मध्ये **"अज्ञानेनावृतं ज्ञानम्"** इति वचनं अज्ञानस्य आवरणशक्तिं सूचयति। शङ्कराचार्यस्य भाष्यानुसारं आत्मा नित्यप्रकाशस्वरूपः; तथापि अविद्यया जीवः देहात्मबुद्ध्या व्यवहारं करोति। अद्वैतपरम्परायां अविद्यायाः द्वे शक्ती स्वीकृते -

**- आवरणशक्तिः – ब्रह्मस्वरूपस्य अप्रकाशः।**

**- विक्षेपशक्तिः – जगत्प्रपञ्चस्य आरोपः।**

ज्ञानस्य उदये एते उभे अपि निवर्तेते।

**(४) भावरूपत्वम्**

अद्वैतवेदान्तस्य एषः अतीव महत्त्वपूर्णः सिद्धान्तः। न्यायदर्शने अज्ञानम् अभावरूपं मन्यते; किन्तु अद्वैतवेदान्ते अविद्या भावरूपा स्वीकृता। कारणम्—यत् केवलाभावः कार्यजनकः न भवति। जगत्प्रपञ्चः, अध्यासः, भ्रान्तिः, सुखदुःखानुभवः—एते सर्वे अविद्या-कार्यत्वेन अनुभूयन्ते। अतः अविद्या कार्योत्पादनसमर्था सत्ता इति स्वीकर्तव्या।

अद्वैतसिद्धि-कारः नव्यनैयायिकानां "अज्ञानम् अभावः" इति मतं युक्तिभिः निराकरोति। तेन प्रतिपाद्यते यत् यदि अविद्या केवला-भावः स्यात्, तर्हि भ्रान्तिज्ञानस्य तथा संसारव्यवहारस्य युक्तिसिद्धिः न सम्भवेत्।

**(५) अनादित्वम्**

अविद्या नित्येति न, किन्तु अनादिः। तस्याः प्रारम्भः न ज्ञायते; तथापि सा अनन्ता नास्ति, यतः ब्रह्मज्ञानोत्पत्तौ निवर्तते। अतोऽस्या अनादित्वं, न तु अनन्तत्वम्।

**(६) ज्ञाननिवर्त्यता**

अविद्या कर्मणा न, उपासनया न, केवलं ब्रह्मात्मैक्यज्ञानोत्पत्त्या निवर्तते। एषः सिद्धान्तः श्रुति-स्मृति-भाष्येषु सर्वत्र प्रतिपादितः। अत एव मोक्षस्य साधनं ज्ञानमेव, नान्यत्।

**उपसंहारः**

एवं समस्ताचार्यमतानां समन्वयेन अविद्यायाः लक्षणं सम्यग-वगम्यते। सा न सत्, नासत्, अपितु अनिर्वचनीया; गुणत्रयात्मिका; आत्मज्ञानस्य प्रतिबन्धिका; कार्यजननसमर्था भावरूपा; अनादिः; ब्रह्मज्ञाननिवर्त्या च। एतदेव लक्षणम् अद्वैतवेदान्ते अविद्यातत्त्वस्य आधारभूतं सिद्धान्तरूपेण स्वीकृतम्। परवर्ती अध्याये एतदेव लक्षणम् अविद्यायाः आश्रयसमस्यायाः विवेचनाय मूलाधाररूपेण उपयुज्यते।

**वेदान्तसार-वेदान्तपरिभाषयोः अविद्याविषये तुलनात्मकविवेचनम्**

अद्वैतवेदान्तपरम्परायां वेदान्तसार तथा वेदान्तपरिभाषा इमौ ग्रन्थौ विशेषमहत्त्वपूर्णौ स्तः। यद्यपि उभौ अपि अद्वैतवेदान्तस्य प्रकरणग्रन्थौ, तथापि तयोः रचनोद्देश्यः, विषयप्रतिपादनपद्धतिः, तर्कशैली, अविद्यानिरूपणक्रमश्च परस्परं किञ्चित् भिन्नौ दृश्येते।

वेदान्तसारः मुख्यतया नवशिक्षार्थिनां कृते विरचितः प्रकरणग्रन्थः। अस्मिन् अद्वैतवेदान्तस्य प्रमुखसिद्धान्ताः सरलभाषया, क्रमबद्ध-रीत्या च निरूपिताः। तस्मात् ग्रन्थकारः अविद्यायाः स्वरूपं संक्षेपेण किन्तु सारगर्भितरूपेण निरूपयति। प्रसिद्धलक्षणे— "सदसद्भ्याम-निर्वचनीयं, त्रिगुणात्मकं, ज्ञानविरोधि, भावरूपम्"—अविद्यायाः सम्पूर्णस्वरूपं निर्दिश्यते। अत्र ग्रन्थकारस्य प्रयोजनं विस्तृतत-र्कनिरूपणं न, अपितु सिद्धान्तस्य स्पष्टप्रतिपादनम्।

तदन्यतः वेदान्तपरिभाषा अद्वैतवेदान्तस्य प्रमाणमीमांसाप्रधानः ग्रन्थः। धर्मराजाध्वरीन्द्रः ज्ञानस्वरूपं, प्रमाणप्रक्रिया, वृत्तिव्याप्तिः, फलव्याप्तिः, अपरोक्षज्ञानम् इत्यादीन् विषयान् सूक्ष्मतया विवेच-यति। अतः अत्र अविद्या स्वतन्त्रविषयरूपेण न विस्तरतो निरूपिता, किन्तु ज्ञानप्रक्रियायाः प्रसङ्गे तस्याः स्वरूपम्, आवरणशक्तिः, विक्षेपशक्तिः, ज्ञानेन निवृत्तिः च विचार्यन्ते।

उभयोः ग्रन्थयोः समानमतं दृश्यते यत् अविद्या अनादिः, ज्ञाननिवर्त्या, अनिर्वचनीया, संसारस्य कारणम् इति। उभौ अपि शाङ्करवेदान्तस्य परम्परां नातिक्रामतः। ब्रह्मज्ञानमेव मोक्षसाधनम्, अविद्यानाशकं चेति सिद्धान्तः उभयत्र समानः।

किन्तु प्रतिपादनपद्धत्यां भेदः दृश्यते। वेदान्तसारे अविद्याया लक्षणं प्रत्यक्षरूपेण प्रदत्तम्; वेदान्तपरिभाषायां तु तस्याः स्वरूपं प्रमाणवि-चारस्य अन्तर्गततया विविच्यते। वेदान्तसारः सिद्धान्तप्रधानः, वेदान्तपरिभाषा तर्कप्रधानः। वेदान्तसारः अध्यात्मप्रवेशिकावत्, वेदान्तपरिभाषा तु नव्यन्यायशैलीनिबद्धा दार्शनिकव्याख्या।

भामती-विवरणप्रस्थानयोः प्रभावोऽपि उभयत्र दृश्यते। वेदान्तसारः सामान्यतया प्राचीनाद्वैतपरम्परायाः सिद्धान्तान् संगृह्णाति। वेदान्त-परिभाषा तु उत्तरकालीनाद्वैतपरम्परायाः, विशेषतः नव्यन्याय-पद्धतेः प्रभावेन, अधिकसूक्ष्मतया ज्ञानप्रक्रियां निरूपयति। अविद्या-याः भावरूपत्वे, ज्ञानविरोधित्वे, अनिर्वचनीयत्वे च उभयोरपि न मतभेदः। उभौ अपि नयतः अविद्या न केवलो ज्ञानाभावः, अपि तु अध्यासस्य कारणभूता, ब्रह्मज्ञानेन निवर्त्यमाना अनादिशक्तिः। तथापि, वेदान्तपरिभाषायां अविद्याया विवेचनं ज्ञानमीमांसायाः अङ्गत्वेन भवति, यतो हि धर्मराजाध्वरीन्द्रस्य मुख्यलक्ष्यं प्रमाण-स्वरूपप्रतिपादनम्। वेदान्तसारे तु अविद्यैव बन्धकारणरूपेण प्रतिपाद्यते, ततः मोक्षसाधनरूपेण ब्रह्मज्ञानस्य आवश्यकता दर्श्यते इति शम्।

**सहायकग्रन्थसूची –**


1. **शङ्कराचार्यः**। ब्रह्मसूत्रशाङ्करभाष्यम्। नूतनदिल्ली :मोतीलाल बनारसीदास, २००० (पुनर्मुद्रणम्)।
2. **शङ्कराचार्यः**। श्रीमद्भगवद्गीताभाष्यम्। गोरखपुरम् : गीता प्रेस, २०२२।
3. **शङ्कराचार्यः**। उपदेशसाहस्री। कोलकाता : अद्वैत आश्रमः, १९९८ (पुनर्मुद्रणम्)।
4. **शङ्कराचार्यः**। विवेकचूडामणिः। कोलकाता : अद्वैत आश्रमः, २००२।
5. **विद्यारण्यस्वामी**। पञ्चदशी। नूतनदिल्ली : मोतीलाल बनारसीदास, १९९६ (पुनर्मुद्रणम्)।
6. **सदानन्दयोगीन्द्रः**। वेदान्तसारः। कोलकाता : अद्वैत आश्रमः, १९९० (पुनर्मुद्रणम्)।
7. **धर्मराजाध्वरीन्द्रः**। वेदान्तपरिभाषा। चेन्नई : अड्यार् लाइब्रेरी एण्ड् रिसर्च् सेन्टर्, १९७१।
8. **सुरेश्वराचार्यः**। नैष्कर्म्यसिद्धिः। नूतनदिल्ली : मोतीलाल बनारसीदास, १९८८।
9. **अप्पय्यदीक्षितः**। सिद्धान्तलेशसंग्रहः। वाराणसी : चौखम्बा विद्या-भवनम्, १९८९।
10. **सदानन्दयोगीन्द्रः**।वेदान्तसारः(सुबोधिनी-टीकासहितः)।वारा-णसी : चौखम्बा संस्कृत प्रतिष्ठानम्, २०१५।